# सन्देशः



**शतायुष्कः पण्डितः सुधाकर चतुर्वेदी**
**जयनगरम्, बेङ्गलूरु ।**

महतः सन्तोषस्य विषयः एषः कर्णाटकराज्ये प्रथमकर्णाटक–संस्कृतविश्वविद्यालयः समारब्धः इति । प्रो. मल्लेपुरं जि. वेङ्कटेशमहाभागस्य कुलपतित्वे अयं संस्कृतविश्वविद्यालयः समुद्घाटित इति महान् आनन्दः सञ्जायते ।

संस्कृतभाषा संस्कृतेः द्योतकसाधनम् । संस्कृतिर्नाम न नागरिकता । आत्मसंरक्षणोपादिका क्रिया एव संस्कृतिः इति वक्तुं शक्यते । नागरिकताः सन्ति बहव्यः । परन्तु संस्कृतिस्तु विश्वमानवसंबद्धा एकैव भवितुमर्हति । भारतीयसंस्कृतिर्नाम न कस्यचित् भूभागस्य सम्बद्धा वर्तते । अपि तु विμाधारभूतस्य परमात्मनः भरतस्य । तस्य सम्बद्धा संस्कृतिरेव भारतीयसंस्कृतिः । संस्कृतिर्नाम विश्वव्यापिनी । अत एव अस्यां संस्कृतौ स्वपरभेदो वा सङ्घर्षो वा न विद्यते ।

ध्वनितं च इदं यजुर्वेदे, तथा च श्रुतिः "– सा संस्कृतिः प्रथमा विμावारा" – सर्वप्रथमतया या विμव्यापिनी वर्तते सैव संस्कृतिः इति अस्याः श्रुतेः तात्पर्यम् । अमुम् एव अभिप्रायं मनसिकृत्य वयम् उद्घोषयामः "वसुधैव कुटुम्बकम्""इति ।

एतादृश्याः विश्वसंस्कृतेः आकारभूतं संस्कृतं न मृतं, न म्रियते च ।

**– शतायुष्कः पण्डितः सुधाकर चतुर्वेदी**